# भूगोळवर्णनम्

नारायणं नमाम्यग्य्यहारायणशिरोधरम् ।
दूरायनमदूरं च पारायणपरायणम् ॥१॥

आघ्रातांम्नायशिरसे स्वाघ्रातकमलोरसे ।
स्मरद्व्रङ्भीनसरसे तुरङ्गशिरसे नमः ॥२॥

नमस्तमस्तरणये मुनये शास्त्रयोनये ।
व्यासायाशेषजनयेऽशनये कुनयैषिणाम् ॥३॥

श्रीये नयोन्नतधिये ह्रिये गतभिये नमः ।
प्रियेक्षणरयेतापिलये सत्यस्य चेङ्गितम् ॥४॥

नमोस्तु भूमये लक्ष्मीजामये याऽस्ति धीमये ।
वराहवदने शास्त्रसदने स्वप्रमोदने ॥५॥

शुद्धायानादिसिद्धाय स्वाध्यायोन्नद्धबुद्धये ।
हृद्याय निरवद्याय मध्वाय च नमो नमः ॥६॥

मनोज्ञमूर्त्यै भारत्यै मतिमत्यै हरेः पदे ।
कृतरत्यै सदोन्नत्यै महाभूत्यै नमो नमः ॥७॥

अरिभ्यः कुत्सितधियां तरिभ्यो भवसागरे ।
गुरुभ्यः सेविनां कल्पतरुभ्यश्च नमो नमः ॥८॥

पूर्वखर्परतः प्रत्यक् खर्परान्तं तथोत्तरात् ।
खर्परादृक्षिणान्तं च मण्डलाकारतः स्थितम् ॥९॥

घनोदकं स्यादिद्वस्तावत्समुद्र इव संश्रुतम् ।

तदन्तर्मण्डलाकारं तमश्च समुदीरितम् ॥ १० ॥

द्विस्तावत्पृथिवीत्युक्तं पृथुत्वाच्छ्रुतिमस्तके ।
तदन्तर्मण्डलाकारा भूश्चेयं समुदीरिता ॥ ११ ॥

पृथिवीसमुद्रपर्यन्तेत्युक्ता या विप्रमण्डले ।
मध्ये सौवर्णगिरिणा मेरुणा सप्तभिः क्रमात् ॥ १२ ॥

द्वीपैस्समुद्रैश्च युता मण्डलाकारतः स्थितैः ।
पञ्चाशत्कोटिविस्तीर्णं मिलित्वैतत्त्रयं किल ॥ १३ ॥

तत्र भूः कोटिसंख्यायां सप्तभिः कोटिभिर्युता ।
ततो द्विगुणितस्यान्धतमसः स्युश्चतुर्दशः ॥ १४ ॥

घनोदकस्य तस्माच्च द्विगुणस्य विचारणे ।
अष्टाविंशत्कोटयः स्युः कोटिसंख्यैवमेव हि ॥ १५ ॥

मेरोर्मध्यप्रदेशात्तु सार्धकोटित्रया मही ।
पूर्वतोऽपरतश्चापि मिलित्वा सप्तकोटियुक् ॥ १६ ॥

एवं घनोदतमसोरपि भागद्वयस्थयोः ।
मेलने तूक्तमानं स्याद्विभागे तु तदर्धकम् ॥ १७ ॥

एवं चैकोनपञ्चाशत्कोटयस्त्रिषु खण्डिताः ।
अवशिष्टैककोटिस्तु विभज्या लक्षसंख्यया ॥ १८ ॥

तच्चतुर्दशलक्षाणि भूमेः स्युस्तमसस्तथा ।
अष्टाविंशल्लक्षता स्याद्घनोदकमपि क्रमात् ॥ १९ ॥

षट्पञ्चाशल्लक्षवत्स्याल्लक्षसंख्यैवमेव हि ।
लक्षाणां नवतेरष्टकस्य चैवं व्यये कृते ॥ २० ॥

सहस्रसंख्ययैव स्याच्छिष्टलक्षद्वयव्ययः ।
अष्टाविंशत्सहस्राणि योजनानि भुवोऽभवन् ॥ २१ ॥

षट्पञ्चाशत्सहस्राणि तमसः क्रमशोऽभवन् ।
सहस्राणां द्वादशकं शतं चाभूद्घनोदके ॥ २२ ॥

सहस्राणां शतस्यैवं सषड्नवतेर्व्यये ।

चत्वार्यत्र सहस्राणि यानि शिष्टानि तानि च ॥ २३॥

शतैरेव विभज्यानि तत्पञ्चशतयोजना ।
भूः स्यात्तमश्च तेनाभूत् द्विःपञ्चशतयोजनम् ॥ २४॥

घनोदकं चतुर्भिस्तद्युक्तं पञ्चशतैरभूत् ।
एवं चार्धसहस्रस्य त्रिसहस्र्याः व्यये कृते ॥ २५॥

या चात्रोर्वरिता पञ्चशती तत्रापि सप्ततिः ।
योजनानि पृथिव्याः स्युस्तमसस्तु शतं तथा ॥ २६॥

चत्वारिंशद्योजनानि घनोदकमतः परम् ।
द्विशतेन तथाऽशीत्या योजनानामभून्महत् ॥ २७॥

एवं नवत्या संयुक्ते गते शतचतुष्टये ।
योजनानां यद्दशकमवशिष्टं ततोऽपि च ॥ २८॥

एकं पृथिव्यास्तमसो द्वयमन्त्ये चतुष्टयम् ।
एवं सप्तव्यये जाते यदत्रोर्वरितं त्रिकम् ॥ २९॥

तस्य च द्वादशक्रोशान् कृत्वैव विभजेद्बुधः ।
सार्धक्रोशः पृथिव्याः स्यात्तमसोऽपि त्रयं स्मृतम् ॥ ३०॥

क्रोशानां तद्बहिःस्थे स्यात्क्रोशषट्कं घनोदके ।
एवं च क्रोशदशके क्रोशार्धे च व्ययीकृते ॥ ३१॥

सार्धक्रोशोऽत्र शिष्टः स्याद्दण्डैस्तं चिभजेद्बुधः ।
हस्तैश्चतुर्भिर्दण्डः स्याद्दण्डानां तु सहस्रकम् ॥ ३२॥

क्रोश इत्युच्यते सद्भिस्तच्चतुष्कं तु योजनम् ।
एवं च सार्धक्रोशस्य दण्डानां स्यात्सहस्रकम् ॥ ३३॥

तथा पञ्चशतं चैव तांश्चापि विभजेद्बुधः ।
दण्डानां द्विशतं चैव चतुर्दशकमेव च ॥ ३४॥

भूमेः प्रकल्पयेद्विद्वांस्तमसश्च चतुःशतम् ।
अष्टाविंशच्च दण्डाः स्युः घनोदकमहाम्बुधेः ॥ ३५॥

शतानामष्टकं पञ्चाशच्च षड्दण्डसंयुतम् ।

एवं दण्डसहस्रस्य तच्चतुःशतकस्य च ॥ ३६॥

अष्टोत्तरायाः नवतेश्चोक्तन्यायाद्व्ये कृते ।
दण्डद्वयस्य शिष्टस्य हस्ताष्टकमुदीरितम् ॥ ३७॥

तत्र भूमेरेकहस्तस्तमसो दोर्द्वयं स्मृतम् ।
घनोदकस्य हस्तानां चतुष्टयमुदीरितम् ॥ ३८॥

हस्तानां सप्तके त्वेवं गते योऽत्रावशिष्यते ।
एको हस्तस्तस्य चापि चतुर्विंशांगुलं स्मृतम् ॥ ३९॥

तत्र भूमेरंगुलानां त्रयं स्यात्तमसस्तु षट् ।
घनोदस्य द्वादश स्युरेवं चांगुलयो गताः ॥ ४०॥

एकविंशतिसंख्याताः पुनरुर्वरितं त्रिकम् ।
नवव्रीहिप्रमाणं स्यात्तत्र भूर्व्रीहिसम्मिता ॥ ४१॥

व्रीहिद्वयेतं तु तमो घनोदं च विचारणे ।
चतुर्व्रीहिप्रमाणेन सहितं स्याद्बहिःस्थितम् ॥ ४२॥

व्रीहीणां सप्तके स्वेवं गते सति च यत्पुनः ।
व्रीहिद्वयं च शिष्टं स्यात्तच्चापि विभजेद्बुधः ॥ ४३॥

एको व्रीहिस्सर्षपाणां सप्तकोपमितः किल ।
एवं च व्रीहियुग्मस्य सर्षपाः स्युश्चतुर्दश ॥ ४४॥

तत्र भूमेस्सर्षपयोर्द्वयं योज्यं तमस्यपि ।
चतुष्टयं सर्षपाणां घनोदेत्वष्टकं स्मृतम् ॥ ४५॥

इयम भूगोळमर्यादा श्रुतिमूला यतोऽखिला ।
अतोऽस्या अविरोधेन सर्वत्रार्थं वदेद्गिराम् ॥ ४६॥

एवं च यत्पुराणोक्तं सप्तांशशतपञ्चकम् ।
भुवो मानाय हरिणा तत्पञ्चशतयोजनम् ॥ ४७॥

तस्यैव सप्तमो योंऽशस्त्वेकसप्ततिरूपकः ।
अस्मदुक्ताधिकांशेन युतस्स च बलादभूत् ॥ ४८॥

यतः कृते युगे पुंसां धान्यादीनां च सर्वशः ।

स्थूलता तेन तत्काले सर्षपैस्सप्तभिर्युतः ॥ ४९॥

व्रीहिश्च स्थूल एव स्यात् तैस्त्रिभिः कथितांगुली ।
युगान्तरस्थांगुलिभिरीषत्स्थूलं भवेद्ध्रुवम् ॥ ५०॥

तन्मूलहस्तदण्डादेः स्थौल्यात्तत्कालकल्पितम् ।
योजनं च भवेत्स्थूलं तद्युगादौ कृता मही ॥ ५१॥

तैरेव योजनैः सृष्टा कल्पादौ किल विष्णुना ।
भूगोलविस्तृतिर्ग्राह्या तत्कार्तयुगयोजनैः ॥ ५२॥

द्विस्तावदितिवेदोक्तवर्त्मनैव विचक्षणैः ।
एकां कोटिं विभज्यैवं भूम्यादित्रितये न्यसेत् ॥ ५३॥

एतत्सर्वं हृदिन्यस्य भूगोळं पूर्वसूरयः ।
पञ्चाशत्कोटिविस्तीर्णं प्राहुस्तच्चातिदुर्गमम् ॥ ५४॥

एवं च पृथिवी सेयं ससप्तद्वीपसागरा ।
लक्षयोजनविस्तारमध्यस्थद्वीपतः क्रमात् ॥ ५५॥

विश्वतः परिवार्यैनं स्थितैः सप्तभिरब्धिभिः ।
द्वीपैश्चान्यैः क्रमेणैव द्विगुणैः पूर्वपूर्वतः ॥ ५६॥

युक्ताऽभूत्स्वर्णभूम्यन्तः कोटिपञ्चकयोजना ।
लक्षैश्च सप्तभिर्युक्ता नित्यमासीद्विचारणे ॥ ५७॥

हैमी भूमिश्च परितः संस्थिताऽन्तिमसागरम् ।
वज्रलेपोज्ज्वलद्बाह्यभागा भास्वन्निभप्रभा ॥ ५८॥

अन्त्याध्यर्धस्थलमिति प्रोक्ता सा च विविच्यते ।
द्विपञ्चाशत्सहस्रा च कोटिमूलकृतैव हि ॥ ५९॥

लोकालोककृतेर्मानसंख्या सङ्कीर्तिता स्फुटम् ।
अतः षड्कोटयो लक्षसप्तकं लक्षमेव च ॥ ६०॥

सिद्धं ब्रह्मभुवोऽन्यस्य भूमिभागस्य केवलम् ।
एवं च सप्तकोटीनां प्रागुर्वरितकोटितः ॥ ६१॥

लब्धानां दशलक्षाणां चतुर्लक्ष्याश्च पूर्तये ।

एका कोटिश्च लक्षाणां षट्कमेव ह्यपेक्षितम् ॥ ६२॥

अतोऽन्तिमसमुद्रस्य परितो मण्डलाकृतेः ।
भागद्वये मिलित्वाऽष्टाविंशल्लक्षयुतं तु यत् ॥ ६३॥

कोटियोजनमानं स्यात्ततोऽप्यर्धं तु यद्भवेत् ।
चतुष्पष्ट्याख्यमेतच्च कयाऽप्यधिकसंख्यया ॥ ६४॥

चत्वारिंशल्लक्षयुक्तलक्षद्वितयरूपया ।
युतमध्यर्धशब्दोक्तं शास्त्रसंख्याप्रपूर्वकम् ॥ ६५॥

तत्रोपसर्जनीभूतवज्रलेपेन सङ्गता ।
अधिशब्दोक्तसंख्या स्याद्भागाः प्रागुदिताश्च ये ॥ ६६॥

विशेषणेऽस्मिन्युज्येरन् शब्दार्थौ यत्समौ मतौ ।
अर्धशब्दोदिता शंख्या विशेष्यपदबोधिता ॥ ६७॥

योजनानां चतुषष्टिलक्षरूपोक्तवर्त्मना ।
विशेष्यस्वर्णभूम्यैव युक्ता स्यान्न ततोऽधिका ॥ ६८॥

अतोऽत्राध्यर्धशब्दस्याप्येवमर्थो भवेद्बलात् ।
अध्यर्धशब्दस्यार्थः स्यादित्थमत्र विचारणे ॥ ६९॥

पञ्चाशत्कोटिसंख्याया न चेद्भङ्गो भवेदिह ।
अर्धाधिकं पूर्वलक्षप्रमाणमिति चोपरि ॥ ७०॥

अध्यर्धशब्दस्यार्थः स्याद्यद्वाग्योग्यार्थवादिनी ।
चतुष्षष्टिद्वयमिताद्यदन्त्यद्वीपतोऽधिकम् ॥ ७१॥

अर्धं तद्द्वीपमानं च स्वर्णभूमेरुदीर्यते ।
ह्युत्तरा लक्षनवतिः कोटिश्चैका तदा भवेत् ॥ ७२॥

कोट्यष्टकेन सहिता स्यादेवं सति भूरियम् ।
तमः षोडशकोटिः स्याद्द्वात्रिंशत्कोटिसंयुतम् ॥ ७३॥

घनोदकं चैवमासन् पञ्चाशत्कोटितोऽधिकाः ।
षट्कोटयः कुतस्ताः स्युस्तद्वाक्यं नैतदर्थकम् ॥ ७४॥

किन्तूक्त एव सम्पूर्णमतेरर्थो मतोऽञ्जसा ।

मृदि व्रीह्यर्थसिद्धार्थप्रमाणं न स्थिरीभवेत् ॥ ७५ ॥

इति मत्वा वज्रलेपे निर्ममेऽतिद्रढिम्नि तत् ।
ग्रन्थबाहुल्यभीत्येदं स्पष्टं नाचष्ट सर्ववित् ॥ ७६ ॥

अधिकार्थोपसर्गोक्त्या संज्ञयाऽऽज्ञापयत्प्रभुः ।
स्वसेवकजनख्यात्यै नित्यं मम हृदम्बुजे ॥ ७७ ॥

कृतधामा मध्वनामा स्पष्टयामास तुष्टधीः ।
लक्षयोजनमानेन घनीभूता तु भूरियम् ॥ ७८ ॥

अन्धन्तमस्तु भूमानादप्यधोऽस्ति घनोदके ।
निमज्जितं तु परितो यदधोगतिरीर्यते ॥ ७९ ॥

नरकादवरोहस्तु तस्य स्यात्कथमन्यथा ।
रोहावरोहौ नरकाद्यतः सूत्रकृतोदितौ ॥ ८० ॥

ऊर्ध्वं लोकालोकगिरिरप्यस्त्यभ्रङ्कषं हि तत् ।
शिलीभूततमोरूपं हिमानीव शिलात्मिका ॥ ८१ ॥

न चेद्द्वारं कुतश्चक्रे चक्रेण यदुपुङ्गवः ।
अनादिकालतः प्राप्ताः कल्याद्यास्तत्र दानवाः ॥ ८२ ॥

असंख्याताः किलाश्नन्ति यातनास्तीव्रवेदनाः ।
लयेऽपि मुक्तिवदिदं विष्वक्तिष्ठत्यनश्वरम् ॥ ८३ ॥

तन्ना जीवा एव तदा विशन्ति जठरं हरेः ।
तत्रापि दुःखरूपत्वादक्षिकुक्षिशिरोव्यथाः ॥ ८४ ॥

आधिव्याधींश्च बहुशो भुञ्जते स्वशरीरगान् ।
हर्याज्ञया सृष्टिकाले पतन्त्यत्र किलाखिलाः ॥ ८५ ॥

अग्निशस्त्रशिलाक्षेयरूक्षपक्षिकृता व्यथाः ।
विण्मूत्रपूयकलिलतमःकूपेष्वनेकधा ॥ ८६ ॥

नानाविधा यातनाश्च पुनर्भोक्तुं हि पूर्ववत् ।
यद्यप्यन्धे तमस्यस्मिन्पतिताः पापिनो जनाः ॥ ८७ ॥

नित्यदुःखात्मका मिथ्याज्ञानमात्रस्वरूपिणः ।

अच्छेद्याभेद्यदेहत्वात्तथाऽप्यस्त्रादिपातनैः ॥ ८८॥

वज्रकल्पजलूकादिव(र)दनैः पावकोष्मणा ।
शिलापातैः पूयमूत्रमलदुर्गन्धतोऽपि च ॥ ८९॥

रुदतां क्रूरशब्दैश्च तिक्तात्युष्णरसादिना ।
वक्त्रनेत्रश्रोत्रनासागात्रेषु च पुनःपुनः ॥ ९०॥

व्यक्तीभवन्ति नित्यानि दुःखान्येव क्षणेक्षणे ।
मुक्तानां मौक्तविषयैर्व्यक्तानेकप्रमोदवत् ॥ ९१॥

पञ्चकष्टमित्याहुर्यत्पञ्चेन्द्रियदुःखदम् ।
रुदतां क्रूरशब्दैश्च क्रूरशस्त्रादिदर्शनैः ॥ ९२॥

क्रूरगन्धैः क्रूररसैः क्रूरास्त्रस्पर्शनैरपि ।
भूमेरन्तस्सप्तलोकाः सन्ति भूगर्तवत्क्रमात् ॥ ९३॥

अतळं वितळं चैव सुतळं च तळातळम् ।
महातळं पञ्चमं स्याद्रसातळमतः परम् ॥ ९४॥

पाताळं सप्तमं ते चायुतयोजनतोऽखिलाः ।
उच्छ्रिता विस्तृताश्चैव यथायोगं भुवोऽन्तरे ॥ ९५॥

एवं सप्ततिसाहस्रयोजनेषु गतेष्वधः ।
भूरेव बहुसाहस्त्रयोजनाऽऽस्ते शिलामयी ॥ ९६॥

ऊर्ध्वं शोडशसाहस्रे गते मेरोर्निखा(या)तनात् ।
लोकसन्धिषु पट्स्वेवं सहस्रार्धस्य संख्यया ॥ ९७॥

त्रिसहस्र्यां गतायां च पुनरेकादशैव तु ।
योजनानां सहस्राणि स्युरधोभागविस्तृतेः ॥ ९८॥

शेषः पाताळलोकेऽस्मिन्सेवितः सर्वपन्नगैः ।
तिष्टत्यमररूपेण घनोदाख्ये महार्णवे ॥ ९९॥

पुच्छेन वायुकूर्मस्य पृष्ठमालम्ब्य शक्तिमान् ।
उन्नम्य स्वफणामेकां दिग्गजैः सह सर्वतः ॥ १००॥

जलोपरि महीमेतां यथाम्बुनि न मज्जति ।

तथा धारयति श्रीमान्सर्वलोकधुरन्धरः ॥ १०१ ॥

सङ्कर्षणाख्यहरिणा हृदिस्थेन समेधितः ।
नवाधिकायां नवतौ योजनानां सहस्रके ॥ १०२ ॥

भुवोऽधस्ताद्वामभागे बहुयोजनविस्तृतः ।
महान् गर्तस्तत्समीपे पुरी संयमनी किल ॥ १०३ ॥

तत्रोग्ररूपी भगवान् यमस्तिष्ठति सर्वदा ।
अतिक्रूरा यमभटास्तत्र सन्ति सहस्रशः ॥ १०४ ॥

नदी वैतरणी तत्र पापिनां भयकारिणी ।
तस्योपान्ते तु नरका रौरवाद्या भयङ्कराः ॥ १०५ ॥

पापिनां शिक्षणकृते कृताः सन्ति सहस्रशः ।
अष्टदिक्पालपंक्तौ तु दक्षिणस्थां दिशि क्रमात् ॥ १०६ ॥

यमस्य नगरी त्वन्या स्वर्गोऽप्यस्ति सुखप्रदा ।
भुवोऽधस्ताद्घनोदं तु चतुर्विंशतिकोटिभिः ॥ १०७ ॥

एकोनशतलक्षैश्च योजनैः सम्मितं किल ।
ततोऽधस्तात्खर्परं तु शतकोटिप्रविस्तरम् ॥ १०८ ॥

तच्च बाह्यावृतिजले हरेरद्भुतकर्मणः ।
महाकूर्मतनोः पृष्ठे तिष्ठत्यणुक(तृ)णोपमम् ॥ १०९ ॥

भूम्या सहैव सत्यान्ता लोकाः सप्त तथोपरि ।
तत्रान्तरिक्षं लक्षेण योजनानां किलोच्छ्रितम् ॥ ११० ॥

अर्धकोट्युच्छ्रितः स्वर्गो विमानावळिसंकुलः ।
कोटियोजनविस्तारौ लोकावेतावुभौ किल ॥ १११ ॥

तत ऊर्ध्वं महर्लोको योजनानां समुच्छ्रितः ।
लक्षाणां पञ्चसप्तत्या सिद्धर्षिगणसंकुलः ॥

(तस्मादूर्ध्वं महर्लोकः पञ्चाशल्लक्षयोजनैः ।
स पञ्चविंशल्लक्षैश्चाप्युच्छ्रितः किल वर्तते ।) ॥ ११२ ॥

तस्मादूर्ध्वं जनो लोकः सार्धद्वादशलक्षया ।

कोट्योच्छ्रितो योजनानां तपोलोकस्ततः परम् ॥११३॥

योजनानामेककोट्या लक्षाणामष्टयुक्तया ।
षष्ट्या सप्ततिसाहस्र्या पञ्चसाहस्रयुक्तया ॥११४॥

उच्छ्रितः किल सिद्धिर्षिसंकुलः सर्वसौख्यदः ।
नानारत्नौघरचिता लोका एते त्रयः किल ॥११५॥

एशां त्रयाणामपि च विस्तारास्त्वेकधैव हि ।
त्रिभागी कृतपञ्चाशत्कोटियोजनमानतः ॥११६॥

तच्च शोडशकोटिभिस्सषड्भिः षष्टिलक्षकैः ।
सषड्कषष्टिसाहस्र्या षट्शतैश्चैव योजनैः ॥११७॥

पुनश्च षष्ट्या षड्भिश्च कलेत क्रोशयुग्मतः ।
एकैकं विस्तृतं ज्ञेयं लोकानां त्रितयं बुधैः ॥११८॥

मिळित्वैषां तु लोकानां यत्कोटीनां चतुष्टयम् ।
लक्षाणि षट्सहस्राणां पञ्चविंशतिरेव च ॥११९॥

एतावत्या योजनानां संख्यया पुनरुच्छ्रितः ।
स्याद्ब्रह्मणः सत्यलोकः सर्वकामधुरन्धरः ॥१२०॥

कोटीनामष्टकाल्लक्षद्विषड्कात्तदुपर्यपि ।
पञ्चाशद्भिः सहस्रैश्चाप्युच्छ्रितं तद्विधेः पदम् ॥१२१॥

विस्तारस्तस्य चाप्युक्तलोकत्रयवदेव हि ।
कन्दवद्विस्तृतं मूले मध्ये क्षामं च नाळवत् ॥१२२॥

चतुर्धा पद्मदलवदन्ते त्वत्यन्तविस्तृतम् ।
इदं लोकात्मकं पद्मं घनोदाम्बुजवद्बभौ ॥१२३॥

सत्यलोकप्रमाणात्तु द्विगुणिकृतमानवान् ।
विष्णोर्लोकस्तु विज्ञेयो यं वैकुण्ठं विदुर्बुधाः ॥१२४॥

कोटीनां षोडशैः पञ्चविंशल्लक्षयुतैस्स च ।
भूलोकादुच्छ्रितो ज्ञेयो विस्तृतिश्च विधेः पदात् ॥१२५॥

द्विगुणा तस्य विज्ञेया स च सर्गलयोज्झितः ।

आचाण्डखर्परादा च वैकुण्ठनिलयाद्धरेः ॥१२६॥

कोटीनामष्टकं पञ्चलक्षेता लक्षसप्ततिः ॥१२७॥

मध्यदेशप्रमाणं स्यान्मुक्ताः संसारसागरात् ।
विमानाबलिभिर्यत्र सञ्चरन्ति ततस्ततः ॥१२८॥

मेरोर्नाभेरूर्ध्वमेवं पञ्चविंशतिकोटयः ।
आचाण्डखर्परात्प्रोक्ता लोकाश्चैते तदन्तरा ॥१२९॥

ऊर्ध्वखर्परपर्यन्तं तथाऽधः परितोऽपि च ।
प्रतीच्युदीचीप्राचीषु दक्षिणस्यां च सङ्ख्यया ॥१३०॥

पञ्चविंशत्कोटयः स्युरा मेरोरा च कर्परात् ।
मेरोर्मूलान्मध्यदेशमारभ्य गणने त्विदम् ॥१३१॥

मिलित्वा गणनायां तु पञ्चाशत्कोटयो मताः ।
अण्डं त्वधस्तादूर्ध्वं च विष्वक्च किल वर्तुलम् ॥१३२॥

सौवर्णं योजनैस्तु स्याच्छतकोटिप्रविस्तरम् ।
उदीच्यां दिशि विष्णोस्तु यादनन्तासनाभिधम् ॥१३३॥

घनोदकान्ते श्रीरूपं धाम मुक्तजनास्पदम् ।
लक्षयोजनतोऽप्यूर्ध्वं तद्विद्वद्भिरुदाहृतम् ॥१३४॥

तथा श्वेतद्वीपसंज्ञं धाम क्षीराम्बुधौ हरेः ।
तच्चोच्छ्रितं भूप्रदेशात् पञ्चाशल्लक्षयोजनैः ॥१३५॥

इमानि त्रीणि धामानि महालक्ष्म्यात्मकानि यत् ।
अनन्तानन्तमुक्तौघैः पूर्णान्यपि पुनःपुनः ॥१३६॥

अवकाशप्रदात्येव न पूर्यन्ते कदाचन ।
सभा भयकृता विश्वकर्मणा निर्मिता च या ॥१३७॥

न पूर्यते किल जनैः किमु वाच्या हरेः पुरी ।
मुनेरुदरमप्यब्धेरवकाशं ददौ किल ॥१३८॥

शक्त्यात्मिकायाः श्रीदेव्याः पुराणीमानि किं पुनः ॥१३९॥

मुक्ताश्च विष्णोरुदरं प्रविश्य प्रलये सति ।
आनन्दमात्रदेहत्वात्तत्राप्यानन्दभोगिनः ॥१४०॥

सृष्टिकाले पुनर्विष्णोर्लोकेष्वेषु समासते ।
गायन्तस्तं नमन्तश्च पश्यन्तश्च पदेपदे ॥१४१॥

नानाभोगांश्च भुञ्जाना रमन्ते किल सन्ततम् ।
अयोध्याख्या मुक्तमात्रगम्या याऽन्तःपुरी हरेः ॥१४२॥

वैकुण्ठसप्तप्राकाराभ्यन्तरे सर्वतो दिशम् ।
भासयन्ती चित्ररत्नगोपुरप्रभयाऽनिशम् ॥१४३॥

परमव्योमसंज्ञाऽऽस्ते विरजाख्या महानदी ।
तां पुरीं परितः पुण्या मज्जतां लिङ्गभङ्गदा ॥१४४॥

परिघेव पुरस्याऽऽस्ते नामुक्तस्तं तरेत्किल ।
सप्तमद्वारपर्यन्तं प्रधानं चास्ति बन्धकम् ॥१४५॥

तदन्तः शक्तिशून्यत्वात्तन्नास्तीति निगद्यते ।
अतः प्रधानपरमव्योम्नोरभ्यन्तरे त्विति ॥१४६॥

पुराणानि जगुः पुण्यां विरजाख्यां महानदीम् ।
मुक्तिकाले योग्यजनैस्सह तत्र निमज्जति ॥१४७॥

ब्रह्मा लिङ्गशरीरस्य भङ्गे तत्र कृते सति ।
निर्मलस्वस्वरूपैअः स्वैः सहान्तःपुरगो भवेत् ॥१४८॥

मुक्तेः प्राक्सप्तमद्वारपर्यन्त सोऽपि गच्छति ।
न ततोऽन्तर्विशेत्तां तु कोऽन्तरन्यो विशेत्पुरीम् ॥१४९॥

अबग्नीरनभोऽहंकृन्महत्तत्वगुणत्रयैः ।
बहिरण्डादावरणैः शतकोटिप्रविस्तरात् ॥१५०॥

क्रमाद्दशोत्तरैर्युक्तमण्डाख्यावरणं महत् ।
द्विसप्तलोकास्तस्यान्तरिदं विश्वं महाद्भुतम् ॥१५१॥

यस्यैकरोमकूपान्तः पूर्त्यै नालं महात्मनः ।
कस्तस्य सदृशो देवो देवेषु स्याद्विचारय ॥१५२॥

सुवर्णात्मा मेरुरयं लक्षयोजनमुच्छ्रितः ।
परितो नवभिः खण्डैर्मण्डितः सिद्धसेवितः ॥ १५३ ॥

प्रमाणगणनायां तु मध्यमेनं विदुर्बुधाः ।
स्थले क्षामः क्रमेणेषदीषद्विस्तृतमूर्तिमान् ॥ १५४ ॥

अन्ते विस्तरवान्हैमो गिरिरुन्मत्तपुष्पवत् ।
अतः शोडशसाहस्रयोजनो मूलतः स्मृतः ॥ १५५ ॥

तावत्या संख्ययैवान्तर्भूमेरपि स मूलतः ।
प्रविष्टः सिद्धयोगीन्द्रैर्मध्येमध्ये कृतालयः ॥ १५६ ॥

द्वात्रिंशद्भिः सहस्रैस्तु योजनैर्मूर्ध्नि विस्तृतः ।
मण्डलाकारतो मूर्ध्नि मूले च त्रिगुणः स्मृतः ॥ १५७ ॥

एवं च साष्टसाहस्रचत्वारिंशत्सहस्रतः ।
योजनानां स मूले स्यान्मण्डलाकारवान्गिरिः ॥ १५८ ॥

षडुत्तरनवत्या तु सहस्राणां स मूर्धनि ।
मण्डलाकारवान्प्रोक्तः सौवर्णाद्रिः सुरप्रियः ॥ १५९ ॥

तन्मध्ये नामतः शातकौम्भी ब्रह्मपुरी किल ।
विचित्ररत्नखचितमन्दिरैरुपशोभिता ॥ १६० ॥

मानतो दशसाहस्र योजना राजतेतराम् ।
तत्र गन्धर्वपतयः सिद्धविद्याधराधिपाः ॥ १६१ ॥

वसिष्ठाद्याश्च मुनयो देवाश्चेन्द्रपुरोगमाः ।
उपासते रत्नचित्रसिंहासनगतं विधिम् ॥ १६२ ॥

अष्टदिक्ष्वष्टदिक्पालपुराणि च यथाक्रमम् ।
सन्ति तेषामेष मेरुस्सौवर्णस्तम्भवद्बभौ ॥ १६३ ॥

विधेः सन्ध्यावन्दनार्थं तत्र गङ्गानदी सदा ।
निपतन्ति ब्रह्मसभाप्राङ्गणे सेव्यतेऽखिलैः ॥ १६४ ॥

जगतां पावनार्थाय सा चतुर्दक्षु शोभना ।
सुधेन्दुधवला पद्मसम्भवस्याऽऽज्ञया क्रमात् ॥ १६५ ॥

प्रवहन्ती चतूरूपैरद्यापि परिदृश्यते ।
सीता पूर्वाब्धिमभ्येति तथेमं दक्षिणार्णवम् ॥ १६६ ॥

अभ्येत्यळकनन्दाख्या विख्याता लोकपावनी ।
चक्षुर्नाम्नी प्रत्यगब्धिं भद्रा चोत्तरसागरम् ॥ १६७ ॥

सेवमानान् दिशिदिशि पावयन्ती पुनःपुनः ।
भगीरथेन चानीता गङ्गा रूपान्तरेण सा ॥ १६८ ॥

स्वस्थमन्दाकिनीरूपादेव नित्यं हिमालये ।
निपतन्ती पुनश्चात्र शिवेन शिरसा धृता ॥ १६९ ॥

अग्रे भगीरथं यान्तमनुयान्ती पुरातनीम् ।
देवप्रयोगे स्वामेव मूर्तिमभ्येत्य कापिले ॥ १७० ॥

पुण्याश्रमे पूर्वदग्धानपुनात्सगरात्मजान् ।
इळावृताख्यखण्डस्तु परितो मेरुनाभितः ॥ १७१ ॥

पूर्वादिदिक्षु तद्भागैर्योजनानां पृथक्पृथक् ।
सहस्राष्टकसंख्यातैर्मूलाधारैश्च तद्बहिः ॥ १७२ ॥

पर्वतैश्च चतुर्दक्षु दशसाहस्रयोजनैः ।
अतिक्रान्ते मध्यदेशे पुनरुर्वरिता तु या ॥ १७३ ॥

पञ्चयोजनसाहस्रमिता भूः सर्वतोऽपि च ।
कीलाद्रीणां चतुर्दिक्षु पुनर्नवसहस्रवान् ॥ १७४ ॥

वर्षेऽस्मिन् केवला नार्यः सञ्चरन्ति दिवानिशम् ।
भवानीशापतस्तत्र पुमान्नभ्येति कश्चन ॥ १७५ ॥

यद्यायाति स च स्त्री स्याद्यथेळाख्यो मनोस्सुतः ।
अर्बुधं च सहस्त्रं च तासां संख्या किलोदिता ॥ १७६ ॥

ताभिस्सहितया गौर्या सह गौरीपतिस्सदा ।
चतुर्मूर्तेर्भगवतः तनुं सङ्कर्षणाभिदाम् ॥ १७७ ॥

उपास्ते किल योगीन्द्रहृदयाम्बुजभास्करम् ।
चतुर्दिक्ष्वस्य मर्यादा पर्वतास्सन्ति विस्तृताः ॥ १७८ ॥

गन्धमादनसंज्ञस्तु योजनद्विसहस्रतः ।
विस्तारवाना निषधादा नीलाच्च समुच्छ्रितः ॥ १७९ ॥

इळावृतात्पूर्वभागे मर्यादापर्वतः स्मृतः ।
दक्षिणस्यां तु निषधः तावद्विस्तारवान्गिरिः ॥ १८० ॥

अस्ति पूर्वापरक्षारसिन्धुपर्यन्तमायतः ।
इळावृतात्प्रतीच्यां तु माल्यवान्नाम पर्वतः ॥ १८१ ॥

आ नीलादा च निषदाद्गन्धमादनवत् स्थितः ।
इळावृतादुत्तरस्यां दिशि नीलाभिधो गिरिः ॥ १८२ ॥

निषधायामविस्तारो वर्तते सिद्धसेवितः ।
भद्राश्वाख्यो महाखण्डः प्राच्यां दिश्येक एव तु ॥ १८३ ॥

आ पूर्वाब्धेर्नापरोऽस्ति हयग्रीवोऽत्र पूज्यते ।
खण्डाधिपतिना भद्रश्रवसा धर्मसूनुना ॥ १८४ ॥

तत्पुरुषजनैरेषवर्षः सर्वत्र पूरितः ।
मर्यादाद्रेः प्रमाणेन सहायमपि मानतः ॥ १८५ ॥

सप्तविंशत्सहस्र्या तु योजनानामुदीरितः ।
पूर्वतो जठराख्योऽस्य सीमा पर्वत ईरितः ॥ १८६ ॥

तथैव देवकूटाख्यो गिरिः पश्चादुदीरितः ।
तौ चाष्टादशसाहस्रयोजनानां प्रमाणतः ॥ १८७ ॥

आयामवन्तावुदित्तौ मध्ये निषधनीलयोः ।
द्वाभ्यां द्वाभ्यां योजनानां सहस्राभ्यां प्रविस्तृतौ ॥ १८८ ॥

एकस्मिन्नपि वर्षेऽस्मिन् द्वौ गिरी निर्मतौ क्रमात् ।
चतुर्दक्षु च साम्याय प्रतीच्यां चैवमेव हि ॥ १८९ ॥

गन्धमादनमानेन सह पूर्वाचलान्तरे ।
वर्षोऽयं नवसाहस्रसम्मितोऽपि भवेत्किल ॥ १९० ॥

न चेन्नवानां वर्षाणामपि च ग्रन्थ एव तु ।
वीप्सा नवनवेत्युक्ता न स्यात्तेनेत्थमूह्यताम् ॥ १९१ ॥

अत एकोऽपि वर्षोऽयं त्रेधा स्यात्खण्डितोऽद्रिभिः ।
सर्वभागेऽपि साम्याय नवत्वं च न हन्यते ॥१९२॥

एवं पश्चिमतोऽप्यूह्यं द्वीपालंकृतये बुधैः ।
हरिवर्षो दक्षिणस्यां निषधाख्यमहागिरेः ॥१९३॥

नवयोजनसाहस्रविस्तृतः किल वर्तते ।
नृसिंहरूपी भगवान् प्रह्लादेन महात्मना ॥१९४॥

अद्यापि पूज्यते नित्यं सह तद्वर्षपूरुषैः ।
ततस्तु हेमकूटाख्यस्सीमा गिरिरुदाहृतः ॥१९५॥

विस्तारः पूर्वगिरिवदायामस्तु दशोन्नतः ।
ततः किम्पुरुषाख्यस्तु खण्डो नवसहस्रकः ॥१९६॥

योजनानां विस्तृतोऽस्ति तस्यापि हिमवान्गिरिः ।
मर्यादापर्वतः प्रोक्तो विस्तारोऽस्यापि पूर्ववत् ॥१९७॥

आयामोऽस्यापि पूर्वाद्रेर्दशोनः परिकीर्तितः ।
सिन्धोर्मण्डलरूपत्वात्क्रमादूनत्वमेतयोः ॥१९८॥

अस्मिन्किम्पुरुषे खण्डे रामं सीतापतिं प्रभुम् ।
सह तद्वर्षपुरुषैरुपास्ते हनुमान्किल ॥१९९॥

ततस्तु भारतो वर्षः पूर्ववर्षप्रमाणवान् ।
आ दक्षिणार्णवात्सोऽपि नराणां पुण्यदः स्मृतः ॥२००॥

अत्रापि हिमवच्छृङ्गे पुण्ये बदरिकाश्रमे ।
नरेण सहितो नारायणः सिद्धर्षिसेवितः ॥२०१॥

नारदेनार्च्यते नित्यं सह सप्तर्षिपुरुषैः ।
व्यासरूपी च भगवानत्रैव किल पूज्यते ॥२०२॥

वायोस्तृतीयरूपेण मध्वेन मुनिभिस्सह ।
मर्यादाद्रिप्रमाणेन सह वर्षत्रिकेऽपि च ॥२०३॥

योजनानां नवनव सहस्राणि प्रकल्पयेत् ।
एवमुत्तरतोऽप्यूह्या वर्षसंख्या विवेकिभिः ॥२०४॥

आरभ्य मेरोर्नाभिं तु न चेद्दिशि दिशीरिता ।
भग्ना पञ्चाशत्सहस्रमानसंख्या भविष्यति ॥ २०५ ॥

त्रयोविंशत्सहस्रेता यदिळावृतभूरियम् ।
चतुर्दक्ष्वा मेरुनाभेरा सीमाद्रिचतुष्टयात् ॥ २०६ ॥

सप्तविंशतिसाहस्रयोजना एव तद्बहिः ।
इमे च परितो वर्षा भवेयुस्तदयं क्रमः ॥ २०७ ॥

न चेत्पञ्चाशत्सहस्रयोजनत्वं कथं भवेत् ।
प्रतीच्यां केतुमालाख्यो वर्षोऽप्येक उदाहृतः ॥ २०८ ॥

अयमप्यपरोऽम्भोधिपर्यन्तस्समुदाहृतः ।
अत्रापि भगवान्विष्णुः कामनामा महाप्रभुः ।
कन्दर्पकोटिसदृशसौन्दर्याद्भुतमूर्तिमान् ॥ २०९ ॥

पुरुषायुरहोरात्रसंख्यया‌ऽऽकृतिभिः कृता ।
द्वासप्ततिसहस्राख्या तावतीभिः प्रजापतेः ॥ २१० ॥

सुताभिस्सहिता वर्षनायिकाभिस्सदा रमा ।
उपास्ते स्वपतिं दिव्यमन्त्रज्ञा मन्त्रपूरुषम् ॥ २११ ॥

पवनः पारियात्रश्चेत्यत्रापि द्वौ गिरी क्रमात् ।
इमौ च पूर्वदिक्स्थाद्रिसमानाऽऽयामविस्तरौ ॥ २१२ ॥

अयं च वर्षो गिरिभिर्विभक्तः पूर्ववत्त्रिधा ।
जम्बुद्वीपमलङ्कर्तुं निर्मात्रा हरिणैव हि ॥ २१३ ॥

नीलाद्रेरुत्तरे भागे रम्यको वर्ष इष्यते ।
अयं च नवसाहस्रयोजनैर्विस्तृतः किल ॥ २१४ ॥

अत्रापि मनुना मत्स्यरूपी नारायणः प्रभुः ।
सदा निषेव्यते वैवस्वताख्येन सहर्षिभिः ॥ २१५ ॥

मर्यादापर्वतोऽस्यापि श्वेताख्यो वर्तते किल ।
पूर्वापराब्धिपर्यन्तो दशांशोनश्च नीलतः ॥ २१६ ॥

विस्तारे नीलसदृशस्तस्याप्युत्तरभागतः ।
हिरण्मयाख्यो वर्षोऽस्य सीमाद्रिः शृङ्गवान्किल ॥ २१७ ॥

पूर्वापराब्धिपर्यन्तो विस्तृतौ श्वेत सम्मितः ।
दशांशोनः श्वेतगिरेस्सिद्धर्षिगणसेवितः ॥ २१८ ॥

वर्षेऽस्मिन्नप्यकूपाररूपिणं पुरुषोत्तमम् ।
अर्यमा सेवते नित्यं सह तद्वर्षपूरुषैः ॥ २१९ ॥

तत उत्तरकुर्वाख्यो वर्षो देवर्षिसेवितः ।
उत्तरार्णवपर्यन्तो वर्षोऽयं च निगद्यते ॥ २२० ॥

अयं च नवसाहस्रयोजनैर्विस्तृतः किल ।
सीमाद्रिभिः सहैषां च मानं दक्षिणवर्षवत् ॥ २२१ ॥

अत्र यज्ञवराहाख्यौ हरिर्नारायणः प्रभुः ।
धरण्या कुरुभिस्सार्धं सर्वदोपास्यते किल ॥ २२२ ॥

हरिवर्षादयो वर्षा दक्षिणस्यां दिशि त्रयः ।
उत्तरस्यां दिशि तथा रम्यकाद्यास्त्रयस्स्मृताः ॥ २२३ ॥

पूर्वापराब्धिपर्यन्तास्सर्वेऽप्यायाा मतः स्मृताः ।
हिमाद्रेः पूर्वभागेऽन्यः कैलासाख्यो गिरिः किल ॥ २२४ ॥

उमया सहितो देवो यत्राऽऽस्ते त्र्यम्बकः प्रभुः ।
करवीराभिधस्तस्य पश्चाद्भागेऽपरो गिरिः ॥ २२५ ॥

तथा शृङ्गवतः पार्श्वद्वये द्वौ पर्वतौ किल ।
त्रिशृङ्गमकरौ नाम्ना सिद्धर्षिगणसंकुलौ ॥ २२६ ॥

एतैर्गिरिवरैर्मेरुश्चतुर्भुज इवाऽऽबभौ ।
जम्बुद्वीपो महानेषः नववर्षसमन्वितः ॥ २२७ ॥

मध्ये हेमाद्रिणा युक्तो मध्यमद्वीप उच्यते ।
लक्षयोजनविस्तारस्सोऽयं द्वीप उदाहृतः ॥ २२८ ॥

परितस्तमिमं द्वीपं क्षारोदार्णव ईरितः ।
लक्षयोजनविस्तारस्सोऽयं दिशि दिशीरितः ॥ २२९ ॥

प्लक्षद्वीपः ततः पश्चात् द्विगुणस्सिद्धसेवितः ।
तावानिक्षुसमुद्रश्चाप्यास्ते तत्परितः किल ॥ २३० ॥

शाल्मलाख्यो महान्द्वीपस्ततोऽपि द्विगुणः किल ।
सुरासिन्धुश्च तन्मान स्तं द्वीपं परितः किल ॥ २३१॥

ततः पश्चात्कुशद्वीपः पूर्वस्मादिद्वगुणः स्मृतः ।
स च सर्पिस्समुद्रेण स्वमानेन समावृतः ॥ २३२॥

ततः क्रौञ्चाभिधो द्वीपो द्विगुणो घृतसागरात् ।
स च द्वीपः स्वप्रमाणदध्याख्योदधिना वृतः ॥ २३३॥

पूर्वद्वीपादिद्वगुणितो द्वीपश्शाकाभिधो महान् ।
मानेन तावता युक्तः क्षीराम्भोधिस्ततः परम् ॥ २३४॥

पुष्कराख्यो महान्द्वीपः पूर्वस्मादिद्वगुणः स्मृतः ।
शुभोदकसमुद्रोऽपि तावन्मानस्ततो बहिः ॥ २३५॥

हेमभूमिस्ततः पश्चाद्वज्रलेप उदाहृतः ।
लोकालोकगिरिश्चान्ते भूमिरेतावती किल ॥ २३६॥

इत्थं मेरोः पूर्वतश्च मेरोर्दक्षिणतोऽपि च ।
पश्चान्मेरोरुदीच्यां च भूरेवं सर्वतः स्थिता ॥ २३७॥

इयं भूस्सर्वजीवानां सर्वाभीष्टफलप्रदा ।
देवानां च मुनीनां च पितॄणां चक्रवर्तिनाम् ॥ २३८॥

मानुषाणां च सुखदा नारायणमःप्रिया ।
सर्वसस्योद्भवा पुण्या सर्वौषधिसमाकुला ॥ २३९॥

पुण्यारण्याश्रमोपेता पुण्यनद्युपबृंहिता ।
श्रेयस्करी तृप्तिकरी रत्नगर्भा वसुन्धरा ॥ २४०॥

धात्री किलेयं जगतस्सेयं सर्वंसहा किल ।
वराहस्याङ्कपर्यङ्का महती राजतेतराम् ॥ २४१॥

घटिकाहोरात्रपक्षमासर्त्वयनरूपतः ।
संवत्सराख्यरूपेण बृहता चोपलक्षितम् ॥ २४२॥

महाकालं स्वगतिभिः क्रमाल्लक्षयितुं नृणाम् ।
नवग्रहाणां राशीनां ताराणां सप्तयोगिनाम् ॥ २४३॥

गन्धर्वाणां च सिध्धानां नृणां पुण्यकृतामपि ।
स्फुरद्रत्नविमानानि परितः स्थानभेदतः ॥ २४४॥

सदा धर्तुं च हरिणा कृतमाश्चर्यकर्मणा ।
रत्नोज्ज्वलस्फुरद्रत्नमयीभिः परितो दिशम् ॥ २४५॥

स्फुरच्चक्रस्य धारावन्मण्डलाकृतिभिः क्रमात् ।
उत्तरोत्तरसंस्थाभिर्बहुसाहस्रयोजनान् ॥ २४६॥

मध्येमध्ये यथायोज्यान्देशानन्तरितानपि ।
स्वभासा भासयन्तीभिर्धाराभिर्बहुभिस्सदा ॥ २४७॥

नवग्रहाणां नवभीराशीनां च तथैकया ।
नक्षत्राणामपरया मुनीनां च तथाऽन्यया ॥ २४८॥

धारणाय द्वादशधा धाराश्चास्य प्रविस्तृताः ।
इदं च कालचक्राख्यनाम्ना विद्वद्भिरीरितम् ॥ २४९॥

हेमन्तशिशिरैक्येन पञ्चारमिति कीर्तितम् ।
मासद्वादशरूपत्वात् द्वादशारमितीरितम् ॥ २५०॥

कालं प्रवर्तयेद्यस्मात्तत्तन्नाम्ना च कीर्तितम् ।
द्वादशारमिति प्राह पञ्चारे चक्र इत्यपि ॥ २५१॥

वामनाख्यहरेः सूक्तमेतस्मादेव कारणात् ।
बहुकोटिमिताकाशे परितो विस्तृतं महत् ॥ २५२॥

आरभ्य मेरुमूर्धानमा चोच्चध्रुवमण्डलम् ।
योजनानां षष्टिलक्षैः षल्लक्षैरयुतैरपि ॥ २५३॥

उच्छ्रितं शिंशुमाराख्यहरिणाऽऽनन्दमूर्तिना ।
कुण्डलीकृतमध्येन भासिताधोमुखश्रिया ॥ २५४॥

ऊर्ध्वीकृतोच्चपुच्छेन सहस्रादित्यतेजसा ।
स्वचक्रवदिदं चक्रं परितो भ्राम्यते किल ॥ २५५॥

मेरोरुपरि लग्नेन सौवर्णाक्षेण भास्वता ।
बहुकोटिप्रमाणेन धृतं स्वान्ते बृहत्तरम् ॥ २५६॥

चक्रं चैकं स्वर्णमयं मानसाचलमूर्धनि ।
सदा भ्रमदिदं ज्योतिश्चक्रं भ्रामयते किल ॥ २५७ ॥

इदं चक्रं कालचक्रभ्रमणायैव निर्मितम् ।
यदीदं चक्रमर्कस्य गतेरेव कृतं भवेत् ॥ २५८ ॥

त्वरिता कालचक्रस्य गतिः केन भवेत्तदा ।
विरुद्धगतियुग्मं तु चक्रेणैकेन को वदेत् ॥ २५९ ॥

अतस्सूर्यरथोऽप्यन्यस्तच्चक्रं चापरं भवेत् ।
इदं तु चक्रं सुमहज्ज्योतिश्चक्रप्रवर्तकम् ॥ २६० ॥

शिंशुमारप्रभावेनैवास्य च भ्रमणं सदा ।
कथं यन्त्रोपरिस्थाश्चैस्तद्यन्त्रभ्रमणं भवेत् ॥ २६१ ॥

कालचक्रस्थसूर्यस्य कथं मन्दप्रचारणम् ।
शनैश्चारयितुं चास्य मध्ये चक्रान्तरं भवेत् ॥ २६२ ॥

रथं धारयदेकं हि चक्रं तस्याध एव हि ।
लोकेऽपि दृश्यते तद्वद्वक्तव्यं सर्वथाऽत्र च ॥ २६३ ॥

ज्योतिश्चक्रगतेरन्या गतिर्नोचेत्कथं रवेः ।
यत्सूर्यरथयात्रा च ग्रहान्तररथोपमा ॥ २६४ ॥

कालचक्रस्य धारासु रथास्तत्तद्ग्रहोचिताः ।
हिरण्मयास्सन्ति नोचेद्गतिस्तेषां कथं भवेत् ॥ २६५ ॥

तत्कालचक्रधारायां सप्तास्वास्सवितूरथम् ।
चक्रेणैकेन परितश्चारयन्ति दिनेदिने ॥ २६६ ॥

यत्तु चक्रं मानसाख्यगिरेर्मूर्धनि पर्यटत् ।
हिरण्मयं रत्नकान्त्या परितो भासयद्दिशः ॥ २६७ ॥

बहुयोजनविस्तारमृताख्यस्य हरेः प्रियम् ।
शिंशुमारस्वरूपेण हरिणा प्रेरितं तु तत् ॥ २६८ ॥

बृहद्रथोपमं ज्योतिर्मयं चक्रोपमत्वतः ।
कालचक्राभिधानं यज्ज्योतिर्मण्डलमुत्तमम् ॥ २६९ ॥

तद्दिवः परितो नित्यं भामयेत्त्वरितं किल ।
मेरुं प्रदक्षिणीकृत्य कालचक्रं च तद्बलात् ॥ २७० ॥

शिंशुमारप्रभावाच्च योजनानां दिनेदिने ।
नवकोटिं लक्षमेकं पञ्चाशल्लक्षमेव च ॥ २७१ ॥

परिभ्रमति नक्षत्रग्रहराशिगणैस्सह ।
शीतोष्णमध्यभेदेन त्र्यात्मकत्वात्त्रिनाभि यत् ॥ २७२ ॥

अनर्वमश्वशून्यत्वात्तस्थौ यस्मिन्किलाखिलम् ।
ग्रहनक्षत्रदेवर्षिसिद्धगन्धर्वसेवितम् ॥ २७३ ॥

कालचक्रमिदं शिंशुमारदेवात्प्रवर्तते ।
सप्तविद्याश्च यन्नाम सदैवाशुगमित्वतः ॥ २७४ ॥

अश्वाख्या एक एवेदं वहतीति यतः श्रुतिः ।
सप्ताश्वनुन्नं तच्चक्रमन्यदेव रथे रवेः ॥ २७५ ॥

यथा सर्वगतो विष्णुर्न रुणद्धि जगद्गतिम् ।
श्वेतद्वीपस्तथैवास्य गतेर्न प्रतिबन्धकः ॥ २७६ ॥

यत्समानत्रिंशदहोरात्राणीति वचस्तु तत् ।
त्रिंशत्पदस्योपरिष्टाद्घटिकापदवद्भवेत् ॥ २७७ ॥

यन्मध्यपदलोपाख्यसमासोऽप्युच्यते बुधैः ।
मुहूर्तानि भवन्तीति वाक्च कल्पककल्प्ययोः ॥ २७८ ॥

ऐक्याभिप्रायतः प्रोक्ता सर्वज्ञव्यासयोगिना ।
अतः समानास्त्रिंशत्यो घटिका यत्र तद्दिनम् ॥ २७९ ॥

सा रात्रिश्च मुहूर्तस्य मानक्लृप्त्यै भवेदिति ।
अर्थोऽभूत्स्मृतिवाक्यस्य युक्तितो नतु शक्तितः ॥ २८० ॥

इदं चार्के मेषतुलासंस्थे स्यान्नान्यथा भवेत् ॥
दिनवृद्धिह्रासयुक्तौ नैतौ मासावुभौ यतः ॥ २८१ ॥

त्रिंशत्त्रिंशद्घटिकताऽत्रैव तन्निशि चाग्नि च ।
चतुर्विंशतिसंख्याता घटिका याः षडुत्तराः ॥ २८२ ॥

ताः षड्भ्योऽर्धं समादाय मुहूर्तान्द्वादशाञ्जसा ।
कुर्युरह्नि च रात्रौ तत्तुलामेषाख्यमासयोः ॥ २८३॥

यत्सार्धघटिकाद्वन्द्वं मुहूर्तं सूरयो विदुः ।
वृषभाद्ये तु राशीनां पञ्चकेऽर्के स्थिते सति ॥ २८४॥

वर्धन्तेऽहानि रात्रिस्तु क्रमात्संक्षयते तदा ।
वृश्चिकादिषु राशिष्वप्येवमर्के स्थिते सति ॥ २८५॥

दिनानि ह्रसितानि स्युर्वर्धन्ते रात्रयोऽपि च ।
तद्द्वादश मुहूर्तानि कथं रात्रेर्दिनस्य च ॥ २८६॥

तदा भवेयुस्तेनात्र न मुहूर्तस्य कल्पना ।
अतो मेषस्थिते भानौ तुलास्थे वा प्रकल्पयेत् ॥ २८७॥

मुहूर्तमानं नान्यत्रेत्याह भागवते शुकः ।
त्रिंशल्लक्षाणि चत्वारि लक्षाण्यष्टशतानि च ॥ २८८॥

योजनानां मुहूर्तेऽस्मिन्नैकैकस्मिन्नवे रथः ।
कालचक्रस्थितो मन्दं पर्यटेत्परितः किल ॥ २८९॥

एवं च कोट्यष्टकानि तथा लक्षाणि षोडश ।
विंशतिं च सहस्राणां सूर्यो याति दिनेदिने ॥ २९०॥

इदं सूर्यगतेर्मानं  यदीषच्छनकैर्हि सा ।
प्रागुक्तगतिमानं तु त्वरया परितो दिवम् ॥ २९१॥

गच्छतः कालचक्रस्येत्याह भागवते शुकः ।
अतो विरुद्धशङ्काऽत्र नैव कार्या विचक्षणैः ॥ २९२॥

लक्षोच्छ्रितः सूर्यरथस्सारुणः सप्तवाहनः ।
कालचक्रस्थितान्राशीन् मन्दं मन्दं व्रजन्क्रमात् ॥ २९३॥

पृष्ठेपृष्ठे स्थितं राशिं स्पृशेन्नोत्तरगामिनम् ।
अतो वामगतिः प्रोक्ता चक्रधारास्थितस्य च ॥ २९४॥

क्रमेण पृष्ठराशिं तु मासमात्रे स्पृशेद्रविः ।
चन्द्रश्चापि ततो मन्दगतित्वात्पृष्ठतः स्थितम् ॥ २९५॥

राशिं सार्धदिनद्वन्द्वेनैव संस्पृशति क्रमात् ।
अतस्त्वरा पृष्ठगतौ न तूत्तरगतौ विधोः ॥ २९६ ॥

संवत्सरेण तु गुरुः पृष्ठराशिं स्पृशेत्किल ।
शनिर्वर्षद्वयेनैव पृष्ठेपृष्ठेऽधिगच्छति ॥ २९७ ॥

अतिमन्दगतित्वात्सः शनैश्चर इतीरितः ।
एवं ग्रहाणां सर्वेशां गतिर्वामेति कीर्त्यते ॥ २९८ ॥

यथा पिपीलिकाधारा तैलयन्त्रे त्वरावति ।
पृष्ठेपृष्ठे भवेन्मन्दं यान्ति तद्वद्ग्रहा इमे ॥ २९९ ॥

यदि ग्रहरथास्सर्वे गच्छेयुर्वामभागतः ।
तर्हि सूर्योदये सूर्यपृष्ठमेवेक्ष्यते नरैः ॥ ३०० ॥

अर्घ्यं कस्य करे दद्युर्गायत्र्या मन्त्रितैर्जलैः ।
अतोऽस्मदुक्तमार्गेणैव वामगतिं वदेत् ॥ ३०१ ॥

सव्येन दक्षिणेनापि सविता कुरुतेऽचलम् ।
इति मूलोदिता वाक्चाप्यसूचयदिमां गतिम् ॥ ३०२ ॥

साक्षाद्वामगतौ सव्यदक्षिणत्वं कथं गिरेः ।
कथं चान्तर्गतं विष्णुं शिंशुमारममी सुराः ॥ ३०३ ॥

परिभ्रमेयुस्सततमप्रदक्षिणयात्रया ।
अक्षाग्रखचिता चैका तुला स्थूला हिरण्मयी ॥ ३०४ ॥

ध्रुवमण्डलसंलग्ना कालचक्रं च बिभ्रती ।
तेनैव सह गच्छेच्च न चेच्चक्रं पतेद्धि तत् ॥ ३०५ ॥

नक्षत्राणां च राशीनामुत्तरोत्तरगामिनाम् ।
प्रदक्षिणा गतिः प्रोक्ता कालचक्रनिवासिनाम् ॥ ३०६ ॥

चतुःपञ्चादिघटिकारूपराशिस्थदेवताः ।
घटिकामानिनस्तावद्यानैर्गच्छन्ति भास्वरैः ॥ ३०७ ॥

मेरुं प्रदक्षिणीकुर्वत्कालचक्रस्थिता अपि ।
ग्रहाः स्वस्वरथैस्तस्मिन् गच्छन्तोऽपि दिनेदिने ॥ ३०८ ॥

तद्वत्वराया राहित्यात्पृष्ठेपृष्ठे भवन्ति हि ।
भूमेर्नवतिसाहस्रयोजनोत्तुङ्गवर्त्मनि ॥ ३०९ ॥

कालचक्रादिधारायां राहोर्मण्डलमीरितम् ।
तत्रैव केतुशतकं राहुणा सह तिष्ठति ॥ ३१० ॥

चक्रच्छिन्नं राहुशिरो हरिणाऽद्भुतकर्मणा ।
सुधापानस्य सामर्थ्याद्भास्वरं चाप्यनश्वरम् ॥ ३११ ॥

ग्रहमण्डलतामेत्य स्थितं केतुशतान्वितम् ।
उपद्रवाय लोकानां चन्द्रसूर्यग्रहाय च ॥ ३१२ ॥

राहोरंशोऽपि तत्राल्पो वर्तते न स पूज्यते ।
तन्नाम्ना याज्ञिकैर्दत्ताप्याहुतिस्तद्गतैस्सुरैः ॥ ३१३ ॥

हरिणा वा हृदिस्थेन भुज्यते नतु राहुणा ।
लक्षयोजनतोऽप्यूर्ध्वे चक्रधारान्तरोपरि ॥ ३१४ ॥

रविः पर्येति महसा भासयन्सर्वतो दिशम् ।
ततोऽपि लक्षादूर्ध्वे तु चक्रधारान्तरोपरि ॥ ३१५ ॥

स्वस्वराशिगतो नित्यं शशी पर्येति सर्वदा ।
पूर्णमण्डलतायां तु सूर्याद्भागान्तरे व्रजेत् ॥ ३१६ ॥

सूर्येन्दुकलयोरेकराशौ योगो भवेद्यदा ।
दर्शमाहुस्तदा राहोरप्यधः सूर्यमण्डलात् ॥ ३१७ ॥

यदैकराशौ योगः स्यात्तदाऽऽहुर्ग्रहणं बुधाः ।
अधो वाऽप्यूर्ध्वदेशे वा राशेः साम्येन या गतिः ॥ ३१८ ॥

स एव योगः सर्वेषां न त्वेकत्र सह स्थितिः ।
ऊर्ध्वाधोगामिनां तेषां कथमेकत्र सङ्गमः ॥ ३१९ ॥

पञ्चग्रहादियोगं चाप्येवमाहुर्विचक्षणाः ।
त्रिंशल्लक्षोपरिं विधोर्नक्षत्रगतिरीरिता ॥ ३२० ॥

मध्यधारासु गन्धर्वसिद्धाद्याः पुण्यकर्मिणः ।
भास्वद्विमानकोटिस्था रमन्ते सस्त्रियः सदा ॥ ३२१ ॥

षड्रसान्नानि भुञ्जानाः फलानि विविधानि च ।
पिबन्तश्च वियद्गङ्गातोयं स्वादु च अशीतलम् ॥ ३२२॥

गायन्तश्चैव नृत्यन्तः क्रीडन्तः परितः किल ।
तारारूपेण तद्यानान्यसंख्यानि भुवि स्थितैः ॥ ३२३॥

नरैरद्यापि दृश्यन्ते ज्योतिश्चक्रं ततो विदुः ।
ताराचन्द्रमसोर्मध्ये राशीनां तु गतिः स्मृता ॥ ३२४॥

लक्षद्वयोर्ध्वमृक्षेभ्यो ह्युक्ता ह्युशनसो गतिः ।
ततो लक्षद्वयादूर्ध्वं बुधस्य गतिरीरिता ॥ ३२५॥

तस्माल्लक्षद्वयादूर्ध्वं कुजस्याहुर्गतिं बुधाः ।
अनन्तरं सुरगुरोर्गतिर्लक्षद्वयोपरि ॥ ३२६॥

शनैश्चरस्यापि गतिः किल लक्षद्वयोपरि ।
एकादशेभ्यो लक्षेभ्योऽप्यूर्ध्वं सप्तर्षिमण्डलम् ॥ ३२७॥

तदन्तरा योजनानां लक्षाण्याहुश्चतुर्दश ।
सप्तर्षिमण्डलादूर्ध्वं ध्रुवस्य किल मण्डलम् ॥ ३२८॥

एषां ग्रहाणां सर्वेषां सदा सञ्चरतां किल ।
अग्रे गायन्ति गन्धर्वा नृत्यन्त्यप्सरसः सदा ॥ ३२९॥

गन्धपुष्पान्नपानादिभोगाश्च स्युः पदेपदे ।
मन्त्रांश्च विविधानेषां भूमिस्था द्विजपुङ्गवाः ॥ ३३०॥

पठन्ति प्रणमन्त्येनान् होमे होमे च जुह्वति ।
सतां शुभफलं दद्युरसतां च विपर्ययम् ॥ ३३१॥

कालचक्रोच्छ्रयस्त्वेवं विस्तरस्तस्य कीर्तितः ।
क्षीराब्धिं परितः पुष्कराख्ये द्वीपे मनोरमे ॥ ३३२॥

मानसोत्तरशैलोऽस्ति चतुर्दिक्ष्वपि भास्वरः ।
तदन्तरप्रदेशोऽपि कोटिद्वन्द्वेन विस्तृतः ॥ ३३३॥

पञ्चाशल्लक्षसहितलक्षयोजनतोऽपि च ।
सञ्चरन्त्यत्र सर्वत्र ज्योतिश्चक्रमहर्निशम् ॥ ३३४॥

तावत्प्रमाणं विज्ञेयं विद्वद्भिर्न्यायकोविदैः ।
व्योम्नोऽपराब्धिद्वारेण पातालं प्रविशन्निनः ॥। ३३५ ॥

पूर्वाम्बुधावुदेतीति केचिदाहुरकोविदाः ।
वेदवादविरोधित्वान्न तन्मतमनुव्रजेत् ॥ ३३६ ॥

उदयास्तगिरी यस्मात्किञ्चिन्मेरोरधः स्थितौ ।
तत्रावतीर्य चक्रं तत्पुनर्यन्त्रप्रभावतः ॥ ३३७ ॥

तैलयन्त्रवदुद्याति तद्भ्रान्तिर्मन्दचक्षुषाम् ।
पातालेऽप्यपरं चक्रं सूर्याचन्द्रमसोः किल ॥ ३३८ ॥

ऊर्ध्वोधो गमनं तस्य भारतेऽपि समीरितम् ।
योजनायुतविस्तारपाताले तिग्मदीधितेः ॥ ३३९ ॥

उदये सति तन्नत्यान् दिवातापेन मूर्छितान् ।
निशि शीतांशुकिरणा जीवयन्ति पुनःपुनः ॥ ३४० ॥

ततो वा भ्रान्तिरेतेषां रज्जौ भुजगबुद्धिवत् ।
यतः श्रुतिः सूर्यगतिमारोहन्नुत्तरां दिवम् ॥ ३४१ ॥

इत्याह तेन व्यासोक्तिरेव मान्या न चापरा ।
वेदव्यासः स भगवान्साक्षान्नारायणः किल ॥ ३४२ ॥

किंच सप्तर्षिगमनं मण्डलाकारतः स्थितम् ।
अद्यापि दृश्यते सर्वैर्ज्योतिश्चक्राग्रगा हि ते ॥ ३४३ ॥

अतो ज्योतिश्चक्रमिदं मेरुं कनकपर्वतम् ।
प्रदक्षिणीकृत्य सदा जगद्भासयते ध्रुवम् ॥ ३४४ ॥

हैममण्डं योजनानां शतकोटि प्रविस्तृतम् ।
अर्बुदं योजनानि स्युरपां गणकसंख्यया ॥ ३४५ ॥

निर्बुदं योजनानि स्युस्तेजोरुपावृतेर्बहिः ।
वायोस्तु खर्वसंख्या तु योजनानां ततः परम् ॥ ३४६ ॥

योजनानां महाखर्वमाकाशस्य प्रकीर्तितम् ।
पद्मं तु योजनानां स्यादहङ्कारस्य तद्बहिः ॥ ३४७ ॥

महापद्मं योजनानां महत्तत्वस्य तद्बहिः ।
क्षोणी तु तमसः प्रोक्तं महाक्षोण्या रजः स्मृतम् ॥ ३४८॥

शङ्खः सत्वगुणस्य स्याद्दशमावरणस्य तु ।
अण्डान्तराण्डकोशस्तु पञ्चशत्कोटिविस्तृतः ॥ ३४९॥

यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः ।
इति श्रुतेरसंख्यातब्रह्मणां चक्रवर्तिनाम् ॥ ३५०॥

मनुष्यपशुपक्ष्यादिजीवानां च दिवौकसाम् ।
सर्पाणां दानवानां च यक्षगन्धर्वजन्मनाम् ॥ ३५१॥

नानाजलचराणां च पिशाचानां च कोटिशः ।
देहाख्यदिव्यमांसैश्च मृत्युर्यस्योपसेचनम् ॥ ३५२॥

इति श्रुतेर्मारकाणां देहाख्यधृतसंस्कृतैः ।
लवणेक्षुसुरासर्पिर्दधिक्षीरशुभोदकैः ॥ ३५३॥

नानारसौघपानीयस्थानीयैरपि संकुलै ।
चित्रौषधाख्यशाकैश्च वनस्पतिभिरेव च ॥ ३५४॥

नानापक्वफलोपेतैर्मिश्रितं विश्वमीदृशम् ।
सङ्कर्षणाग्निना पक्वमण्डाख्ये हैमभाजने ।
स्वयं पाकीव भगवान् महाकायो जनार्दनः ॥ ३५५॥

भुक्त्वा पुनर्जीर्तिकाम इव सौवर्णभस्म च ।
अण्डदाहसमुद्भूतं स्वान्तस्थेन महाग्निना ॥ ३५६॥

पुनःपुनश्च क्वथितं बहिरावरणोदकम् ।
स्वीकृत्य भार्यया लक्ष्म्या सह तद्रूपवारिधौ ॥ ३५७॥

वटपत्रपुटे शेते निद्रालुरिव लीलया ।
इत्थं भुवनमर्यादा कीर्तिता प्रीतये हरेः ॥ ३५८॥

मध्वस्य वाण्या देवानां गुरूणां च सदा मुदे ।
पूर्णबोधार्यभक्तेन वादिराजाख्यभिक्षुणा ॥ ३५९॥

वाक्यार्थकथनव्याजाद्भूजोळमिति वर्णितम् ॥ ३६०॥

नमोऽस्तु लक्ष्मीपतये गतयेऽखिलयोगिनाम् ।
नमोऽस्तु पूर्णप्रज्ञाय शास्त्राभिज्ञाय सर्वदा ॥ ३६१॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

भूगोळवर्णनं समाप्तम्

## भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु